# तेजबिन्दूपनिषत्

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्र्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।

ॐ शान्तिः शान्तिः शान्तिः।

ॐ तेज़बिन्दुः परं ध्यानं विश्वात्मं हृदि संस्थितम् ।
आणवं शाबवं शाक्तं स्थूलं सूक्ष्मं परं च यत् ॥ १॥

दुःसाध्यं च दुराराध्यं दुष्प्रेक्ष्यं च मुक्तमव्यम् ।
दुर्लक्षं दुस्तरं ध्यानं मुनीनां च मनीषिणाम् ॥ २॥

जिताहारो जितक्रोधो जितसङ्गो जितेन्द्रयः ।
निर्द्वंद्वो निरहंकारो निराशीरपरिग्रहः ॥ ३॥

अगम्यगम्यकर्ता च गुरुमानार्थमानसः ।
मुखानि त्रीणि विन्दन्ति त्रिधामा हंस उच्यते ॥ ४॥

परं गुह्यमिदं स्थानमव्यक्तं ब्रह्म निराश्रयम् ।
व्योमरूपं कलासूक्ष्मं विष्णोस्तत्परं पदम् ॥ ५॥

त्र्यम्बकं त्रिगुणं स्थानं त्रिघातु रूपवर्जितम् ।
निश्चलं निर्विकल्पं च निराधारं निराश्र्यम् ॥ ६॥

उपाधिरहितं स्थानं वाङ्मनोऽतीतगोचरम् ।
स्वभावभावनाग्राह्यं संघातैकपदोज्झितम् ॥ ७॥

आनन्दं नन्दनातीतं दुष्प्रेक्ष्यमजमव्ययम् ।
चित्तवृत्तिविनिर्मुक्तं शाश्वतं ध्रुवमच्युतम् ॥ ८॥

तद्ब्रह्माणं तदध्यातं तन्निष्ठा तत्परायणम् ।
आचित्तचित्तमात्मानं तद्व्योम परमं स्थितम् ॥ ९॥

शून्ये शून्यभावं च शून्यातीतमवस्थितम् ।
न ध्यानं न च वा ध्याता न धेयो ध्येय एव च ॥ १० ॥

सर्वं तत्परमं शून्यं न परं परमात्परम् ।
अचिन्त्यमप्रबुद्धं च न च सत्यं न संविदुः ॥ ११ ॥

मुनीनां तत्त्वयुक्तं तु न देवा न परं विदुः ।
लोभं मोहं भयं दर्पं कामं क्रोधं च किल्बिषम् । १२ ॥

शीतोष्णं क्षुत्पिपासं च संकल्पं च विकल्पकम् ।
न ब्रह्मकुलदर्पं च न मुक्तिं ग्रन्थसंचयम् ॥ १३ ॥

न भयं सुखदुःखं च तथा मानापमानयोः ।
एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परं ॥ १४ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।

ॐ शान्तिः शान्तिः शान्तिः ।

इत्यथर्ववेदे तेजबिन्दूपन्निषत्समाप्ता ॥

---

Tejabindu Upaniṣad
transliterated by: Anshuman Pandey [*apandey@u.washington.edu*]
16 April 1996
Proofread by Vijay Pai vijaypai@rice.edu